# 2019-20

## आदर्श-प्रश्न-पत्रम्- 3

## कक्षा – दशमी

(CLASS- X)

## विषयः -संस्कृतम् (संप्रेषणाधारितम्)

(COMMUNICATIVE SANSKRIT)

**अवधि – होरात्रयम्** **पूर्णांकाः – अशीतिः (80)**

**(Time allowed - 3 Hours)** **( Maximum Marks - 80)**

खण्डः कः - अपठितांश-अवबोधनम् - 10 अंकाः

SECTION –A - Unseen Reading Comprehension - 10 Marks

खण्डः खः – रचनात्मक-कार्यम् - 15 अंकाः

SECTION – B WRITING SKILLS - 15 Marks

खण्डः गः - अनुप्रयुक्त- व्याकरणम् - 25 अंकाः

SECTION – C - Applied Grammar - 25 Marks

खण्डः घः – पठित –अवबोधनम् - 30 अंकाः

SECTION – D – Reading Comprehension - 30 Marks

**निर्देशाः**– 1.अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

The Question paper has four sections

2.प्रश्नानाम् उत्तराणि क्रमेण लेखनीयानि ।

The answers to each Question must be written in one place.

3.प्रश्नपत्रानुसारं प्रश्नसंख्या अवश्यमेव लेखनीया ।

Write the Question number according to the Question paper

4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

Answer all Questions in Sanskrit

---

**खण्डः – क (Section A)-**

**(अपठितांश-अवबोधनम् ) - 10 अंकाः**

**Unseen Reading Comprehension(10 marks)**

**प्र.1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत – [10]**

Read the following passage and answer the following question in Sanskrit:

**कस्मिंश्चित् स्थाने चत्वारः ब्राह्मणपुत्राः आसन् । तेषु त्रयः शास्त्रेषु पण्डिताः परं बुद्धिहीनाः आसन् । एकः शास्त्रहीनः परं बुद्धिमान् आसीत् । एकदा ते सर्वे धनोपार्जनाय प्रस्थिताः। मार्गे ते मृतसिंहस्य अस्थीनि अपश्यन्। प्रथमः अवदत् -"अद्य विद्यापरीक्षा कर्त्तव्या। अहं तु अस्थि-संचयं करोमि।" द्वितीयेन मांसं-रुधिरं च संयोजितम्। तृतीयः यावत् जीवनं संचारयतितावत् चतुर्थेन निषिद्धः – "मैवम्। एषः जीवितो भूत्वा अस्मान् खादिष्यति।" इत्युक्त्वा सःवृक्षम् आरोहत्। जीवन्यासे सति सिंहः तान् त्रीन् मारयित्वा अखादत्।चतुर्थः वृक्षादवतीर्य गृहमगच्छत्।**
**अतो ज्ञायते यत् बुद्धिः परमावश्यकी।**

**I.एकपदेन उत्तरत - (1×2=2)**

एक शब्द में उत्तर दीजिए –

Answer in one word:

(i) कति ब्राह्मणपुत्राः आसन् ?

(ii) प्रथमः किम् अकरोत् ?

**II. पूर्णवाक्येन उत्तरत - (2×2=4)**

पूर्णवाक्येन उत्तर दीजिए -

Answer in complete sentence:

(i) ब्राह्मणपुत्राः किमर्थम् प्रस्थिताः ?

(ii) जीवन्यासे सति सिंहः किम् अकरोत् ?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत - (0.5×4=2)**

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए –

Choose and write the appropriate answer from the given options:

(i) 'बुद्धिमान्'अस्य कः विलोमः गद्यांशे प्रयुक्तः ?

(अ) बुद्धिहीनः (ब)शास्त्रहीनः (स) शास्त्रपण्डितः(द)ब्राह्मणपुत्राः

(ii) चतुर्थपुत्रस्य विशेषणपदं किम् ?

(अ) बुद्धिहीनः (ब)'बुद्धिमान्' (स) शास्त्रपण्डितः(द)ब्राह्मणपुत्राः

(iii) 'एषः जीवितो भूत्वा' अत्र एषः सर्वनाम कस्मै प्रयुक्तम् ?

(अ) पुत्राय (ब) पण्डिताय (स) ब्राह्मणाय (द) सिंहाय

(iv) ‘अपश्यन्’क्रियापदस्य किं कर्तृपदम् अस्ति ?

(अ) सः (ब) एषः (स) ते (द) अहम्

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। (2×1=2)**

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए -

Write the appropriate title in Sanskrit.

## खण्डः खः (SECTION B)

**रचनात्मक-कार्यम् / Writing skills - 15 Marks**

2. **अनुजं प्रति लिखितम् अधः पत्रं मंजूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।** (0.5×10=5)

अपने छोटे भाई के प्रति लिखे गए पत्र में मंजूषा से उचित पद चुनकर पूर्ति करें -

Complete the following letters and address it to your friend describing your Schools annual day with the word given in the box.

------------------(1)

तिथिः -------------

प्रिय --------------------( 2)

शुभाशीषः।

अहमत्र ----------------(3) त्वमपि तत्र कुशली असि इति मन्ये। मातापितरौ त्वां सर्वदा ------------------(4)। अग्रजा आगामिसप्ताहे गृहम् ------------(5 )। त्वम् अपि यदि --------------------(6) इच्छसि तर्हि आगच्छ। एतद्विषये अग्रजा अपि पत्रं ----------------(7)।तव अध्ययनं ---------------(8) चलति इति वयं चिन्तयामः। अन्यत् सर्वं ---------------(9)।सर्वेभ्यः मित्रेभ्यः मदीयाः शुभकामनाः।

तव ------------- (10)

सुरेशः |

| |
|---|
| मंजूषा - **लेखिष्यति, दिल्लीतः, सम्यक् , कुशली , अनुज ! , आगमिष्यति , कुशलम् , अग्रजः, स्मरतः, आगन्तुम्** |

3. **अधःप्रदत्तं चित्रं दृष्ट्वा मंजूषाप्रदत्तशब्द सहायतया पंच वाक्यानि संस्कृतेन लिखत- (1×5=5)**

नीचे दिए गए चित्र का वर्णन मंजूषा में दिए गए शब्दों की सहायता से पाँच संस्कृत वाक्यों में कीजिए -

Describe the following picture in five Sanskrit sentences with the help of the words given in the box.

| |
|---|
| मंजूषा - उद्यानम् , वृक्षाः , विशालाः , ’डायनोसरः’इति जीवस्य मूर्तिः , अधः , बालकौ, सुंदरं , चित्रम्, स्तः |



**अथवा**

**मंजूषाप्रदत्तशब्दसहायतया निम्नलिखितंविषयम् अधिकृत्य पंचवाक्यैः संस्कृतेन एकम् अनुच्छेदं लिखत- (1×5=5)**

मंजूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर पाँच वाक्यों में एक अनुच्छेद लिखिए -

Write a paragraph in five Sanskrit sentences on the following topic with the help of the words given in the box.

**कविः कालिदासः**

| |
|---|
| मंजूषा -- संस्कृतस्य , श्रेष्ठः , कविकुलगुरुः , उपमालंकारस्य ,सिद्धहस्तः , प्रयोगे , सप्त ,रचनाः , नाटकम् |

4 .**अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत-** **(1X5=5)**

1. एक बालक विद्यालय जाता है |
2. दो बालिकाएँ खेल रही हैं |
3. वह मित्र के साथ उपवन जाता है |
4. फूल खिलते हैं |
5. गायक गीत गाता है |

**खण्डः गः (Section C)**

**अनुप्रयुक्त- व्याकरणम् / Applied Grammar- 25 अंकाः**

**5. अधोलिखित-वाक्येषु रेखांकितेषु पदेषु सन्धिं विच्छेदं वा कृत्वा लिखत -** **( 1×4=4 )**

निम्नलिखित वाक्यों में रेखांकित पदों में संधि अथवा विच्छेद कर विकल्पों में से शुद्ध उत्तर चुनकर लिखिए -

Write the underlined words of the following sentences after joining the disjoining Sandhis:

1. **त्यागात्+शान्तिः** प्राप्यते|
2. यत्र यत्र **वृक्षच्छाया** तत्र तत्र पथिकाः|
3. **कीटः+अपि** सुमनः सङ्गाद् सतां शिरः आरोहति |
4. **पितुरिच्छा** वर्तते|

**6. अधोलिखित-वाक्येषु रेखांकितपदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत -** **( 1×4=4 )**

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए-

Choose and write the correct compounded or expounded form of the underlined words in the following sentences.:-

(i) यथाशक्ति धनं यच्छतु ।

(अ) शक्ति-सहितम्  (ब) शक्तेः योग्यम्  (स) शक्तिम् अनतिक्रम्य

(ii)  पीतम् अम्बरम् यस्य सः हरिः समुद्रे वसति  ।

(अ) पीतम्बरः  (ब) पीताम्बरी (स) पीताम्बरः

(iii)  दिनकरः आकाशे भासते ।

(अ)  दिनस्य करः (ब) दिनं करोतीति (स) दिने करोति

(Iv) रामः च श्यामः च ग्रामं गच्छतः ।

(अ) रामश्यामौ  (ब) रामश्यामाः (स)रामश्यामे

**7. रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् चित्वा लिखत – (1×4=4 )**

निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति प्रत्ययों को जोडकर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए -

Write the underlined words of the following sentences after joining  or disjoining suffixes to the root words selecting the correct answer from the option given below:-

(i) मनुष्यः समाज + ठक् प्राणी ।

(अ) समाजिकः (ब)सामाजिकः (स)समाजवान् (द)समाजी

(ii) जननी तुल्यवत्सला भवति

(अ) तुल्यवत्सल+टाप् (ब) तुल्यवत्सल+आप्  (स) तुल्यवत्स+लाप् (द) तुल्य+वत्सला

(iii) सृष्टेः रमणीयतां पश्य ।

(अ ) रम्+अनीया  (ब) रमण+ईय (स) रमणीय +तल् (द) रमणीयत +टाप्

(iv) हनुमान्  बुद्धि+मतुप्  आसीत्|

(अ) बुद्धिमान (ब) बुद्धिमान् (स) बुद्धिमानी  (द) बुद्धिमानम्

**8.प्रदत्त- विकल्पानां सहायतया वाच्य-परिवर्तने रिक्तस्थानानि पूरयत - ( 1×3=3 )**

प्रदत्त विकल्पों की सहायता  से निम्नप्रदत्त वाच्य परिवर्तन में शुद्ध उत्तर से रिक्तस्थान भरिए

Fill in the following dialogue by choosing the write words as per rule of  voice.

(i).वानरेण ------------------ खाद्यन्ते ।

(अ)फलम् (ब) फले (स) फलानि (द) फलेन

(ii) ---------- किं क्रियते  ?

(अ) अहम् (ब) त्वम् (स) त्वया (द) सः

(iii) मया सम्प्रति संस्कृतं --------- ।

(अ) पठामि (ब) पठ्यते (स) पठ्यन्ते (द) पठ्ये

**9.अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम् ।** **(1×4=4)**

अधोलिखित दिनचर्या में रिक्तस्थानों की पूर्ति कालबोधक –शब्दों से कीजिए -

Rewrite the time table using the Sanskrit work in place of figures:-

(i) भरतस्य पिता प्रातः4.30 --------------------- वादने उत्तिष्ठति ।

(ii) सः 6.15 -------------------- वादने समाचारपत्रं पठति ।

(iii ) सः 9.00 ------------------- वादने कार्यालयं गच्छति ।

(iv) सः सायं 6.45 -------वादने कार्यालयाद् गृहं प्रत्यागच्छति ।

**10.प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत –** **(1×3=3)**

निम्नलिखित वाक्यों में रिक्तस्थानों की पूर्ति मंजूषा में दिए गए उचित अव्यय पदों द्वारा कीजिए-

Fill in the blanks of the following sentences with appropriate indeclinable words given in the box.

मंजूषा – [ यत्र, सम्प्रति, एव, श्वः, बहिः, उच्चैः ]

(i) रात्रौ गृहाद् ----------------- भ्रमणं नोचितम् ।

(ii) सत्यम् --------------------- जयते ।

(III)--------------- जलं तत्र पक्षिणः समायान्ति ।

(IV) स: सर्वं वृत्तान्तं निवेद्य सकरुणं ............. अक्रंदत् |

(V)..................... अहं पुस्तकं पठामि |

(VI) स: ............ वाराणसीं गमिष्यामि |

11. **रेखांकित-पदेषु अशुद्धिसंशोधनं कृत्वा प्रदत्तस्थाने लिखत -** ( 1×3=3)

अधोलिखित वाक्यों में रेखांकित पद अशुद्ध है । अशुद्ध शब्दों को शुद्ध कर पुनः लिखिए -

Correct the underlined incorrect words and rewrite the following sentences.

(i) अहं कदापि असत्यं न वदामः । (वदति / वदामि/ वदेत )

(ii) अहं जनकं सह आपणं गमिष्यामि ।(जनकेन/ जनके/ जनकस्य )

(iii) सत्यं ब्रूयात् प्रियः ब्रूयात् ।( प्रियेण / प्रियं / प्रियाय )

**खण्डः घः**

**पठित –अवबोधनम् /Reading Comprehension) - 30 Marks**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नामुत्तराणि लिखत –**

निम्नलिखित गद्यांश ,पद्य और मनाट्यांशों को पढकर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए-

Read the following prose, poetry and drama passage and answer the given Question in Sanskrit:-

**कश्चन निर्धनो जनः भूरि परिश्रम्य किंचित् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येण पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।**

(i) एकपदेन उत्तरत- 1/5 X2=1

(क) कः व्याकुलः जातः?

(ख) छात्रावासे कः अवसत् ?

(ii) पूर्णवाक्येण उत्तरत – 1X1=1

(क) निर्धनः पुत्रम् कुत्र प्रवेशं दापयितुं सफलः अभवत् ?

(iii) निर्देशानुसारमुत्तरत – 1X3=3

(क) **परमर्थकार्श्येण पीडितः स बसयानं विहाय पदातिरेव प्राचलत्** इत्यस्मिन् वाक्ये प्राचलत् इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम् ?

(ख) 'असफलः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तः?

(ग) धनं इतस्य पदस्य कः पर्याय: अत्र प्रयुक्त: ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रश्नानुत्तरत।**

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।**
**अविज्ञो पुरुषो नास्ति योजकस्तत्र दुर्लभः।।**
**संपत्तौ च विपत्तौ च महतामेकरुपता।**
**उदये सविता रक्तः रक्तश्चास्तमये तथा।।**

(i) एकपदेन उत्तरत- 1/5 X2=1

(क) अनौषधं किं न अस्ति?

(ख) कः दुर्लभः?

(ii) पूर्णवाक्येण उत्तरत – 1X1=1

(क) महतामेकरूपता कुत्र भवति?

(iii) निर्देशानुसारमुत्तरत – 1X3=3

(क) श्लोके मन्त्रम् इति पदस्य किं विलोमपदं प्रयुक्तम्?

(ख) श्लोके सूर्यः इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(ग) अमन्त्रम् अक्षरम् अनयो: पदयो: विशेषणपदं किम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानुत्तरत।**

**चाणक्यः – वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।**

**शिष्यः- तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्!**

**(उभौ परिक्रामतः)**

**शिष्यः- (उपसृत्य) उपाध्याय अयं श्रेष्ठी चन्दनदासः।**

**चन्दनदासः – जयत्वार्यः।**

**चाणक्यः – श्रेष्ठिन्! स्वागतं ते अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः?**

**चन्दनदासः – ( आत्मगतम्) अत्यादरः शंकनीयः। (प्रकाशम्) अथ किम् । आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।**

**चाणक्यः- भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।**

**चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिष्यते इति।**

**चाणक्यः- भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।**

**चन्दनदासः- ( सहर्षम्) आर्य! अनुगृहीतोऽस्मि।**

(i) एकपदेन उत्तरत- 1/5 X2=1

चाणक्यः कं द्रष्टुमिच्छति?

राजानः प्रीताभ्यः प्रकृतिभ्यः किम् इच्छन्ति?

(ii) पूर्णवाक्येण उत्तरत - 1X1=1

अर्थसम्बन्धः कस्य प्रीतिमुत्पादयति?

(iii) निर्देशानुसारमुत्तरत – 1X3=3

(क)प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः इति वाक्ये इच्छन्ति इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

(ख)' प्रकृतिभ्यः' इति पदस्य किं विशेषणपदमत्र प्रयुक्तम्?

(ग) शंकनीयः इति विशेष्यपदस्य विशेषणपदं किम् ?

**15. अधोलिखितवाक्येषु रेखांकितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -** 1X4=4

क. <u>महानगरेषु</u> वाहनानाम् अनन्ताः पंक्तयः धावन्ति।

ख. त्वं <u>मानुषात्</u> बिभेषि।

ग. <u>अरयः</u> व्यायामिनं न अर्दयन्ति।

घ. सुराधिपः <u>ताम्</u> अपृच्छत्।

**16. अधोलिखितश्लोकयोः अन्वयं मंजूषातः समुचितक्रमेण पूरयत-** **½ X8=4**

(क) **पिता यच्छति पुत्राय बाल्ये विद्याधनं महत |**

**पितास्य किम् तपस्तेपे इत्युक्तिस्तत्ककृतज्ञता ||**

**अन्वयः-** पिता (i)................बाल्ये महत (ii).................... यच्छति | अस्य (पुत्रस्य) पिता किम्  (iii).................तेपे इति (iv).....................तत्कृतज्ञता |

**मंजूषा-**

| |
|---|
| धनं, उक्तिः, पुत्राय, तपः |

(ख) **अवक्रता यथा चित्ते तथा वाची भवेद यदि |**

**तदेवाहु: महात्मानः समत्वमिति तथ्यतः ||**

**अन्वयः-** यथा (i).................चित्ते तथा यदि (ii)...................भवेत्, महात्मानः (iii).................तदेव(iv).................... इति आहु: |

**मंजूषा-**

| |
|---|
| वाचि, समत्त्वं, अवक्रता, तथ्यतः |

**17. घटनाक्रमानुसारं वाक्यानि पुनः लिखत-** - **½ X8=4**

(1) एकः कृषकः आसीत |

(2) कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमान: अवर्तत |

(3) तस्य समीपे बलिवर्दौ आस्ताम् |

(4) कृषीवल: क्रुद्धः अभवत् |

(5) स: जवेन गन्तुम अशक्तः च आसीत् |

(6) तमुत्थापायितुम बहुबारं यत्नमकरोत तथापि स: नोथितः |

(7) स: ऋषभ: हलमूढवा गन्तुम अशक्तः क्षेत्रे पपात् |

(8) तयो: बलिवर्दयो: एकः शरीरेण दुर्बलः आसीत् |

**18. समुचितानि पर्यायपदानि मेलनं कुरुत-** **1X3=3**

| | |
|---|---|
| (1) जीवितं | पवित्रम् |
| (2) शुचि: | कथ्यते |
| (3) उच्यते | जीवनं |